श्री रमापत्यष्टकं

श्री रमापत्यष्टकं

जगदादिमनादिमजं पुरुषं
शरदंबरतुल्यतनुं वितनुं |
धृतकंजरथांगगदं विगदं
प्रणमामि रमाधिपतिं तमहं || 1 ||

कमलाननकंजरतं विरतं
हृदि योगिजनैः कलितं ललितं |
कुजनैः सुजनैरलभं सुलभं
प्रणमामि रमाधिपतिं तमहं || 2 ||

मुनिबृंदहृदिस्थपदं सुपदं
निखिलाध्वरभागभुजं सुभुजं |
हृतवासवमुख्यमदं विमदं
प्रणमामि रमाधिपतिं तमहं || 3 ||

हृतदानवदृप्तबलं सुबलं
स्वजनास्तसमस्तमलं विमलं |
समपास्त गजेंद्रदरं सुदरं
प्रणमामि रमाधिपतिं तमहं || 4 ||

परिकल्पितसर्वकलं विकलं
सकलागमगीतगुणं विगुणं |
भवपाशनिराकरणं शरणं
प्रणमामि रमाधिपतिं तमहं || 5 ||

मृतिजन्मजराशमनं कमनं
शरणागतभीतिहरं दहरं |
परिपुष्टमहाहृदयं सुदयं
प्रणमामि रमाधिपतिं तमहं || 6 ||

सकलावनिबिंबधरं स्वधरं
परिपूरितसर्वदिशं सुदृशं |
गतशोकमशोककरं सुकरं
प्रणमामि रमाधिपतिं तमहं || 7 ||

मथितार्णवराजरसं सरसं
ग्रथिताखिललोकहृदं सुहृदं |
प्रथिताद्भुतशक्तिगुणं सुगुणं
प्रणमामि रमाधिपतिं तमहं || 8 ||

सुखराशिकरं भवबंधहरं
परमाष्टकमेतदनन्यमतिः |
पठतीह तु योऽनिशमेव नरो
लभते खलु विष्णुपदं स परं || 9 ||

इति श्रीमत्परमहंस स्वामि ब्रह्मानंद विरचितं श्री रमापत्यष्टकं |